श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - १८

### *पृथुचरितवर्णनम्*

जातस्य ध्रुवकुल एव तुङ्गकीर्ते-
    रङ्गस्य व्यजनि सुतः स वेननामा।
तद्दोषव्यथितमतिः स राजवर्यः
    त्वत्पादे निहितमना वनं गतोऽभूत्॥ १ ॥

पापोऽपि क्षितितलपालनाय वेनः
    पौराद्यैरुपनिहितः कठोरवीर्यः।
सर्वेभ्यो निजबलमेव संप्रशंसन्
    भूचक्रे तव यजनान्ययं न्यरौत्सीत्॥ २ ॥

संप्राप्ते हितकथनाय तापसौघे
    मत्तोऽन्यो भुवनपतिर्न कश्चनेति।
त्वन्निन्दावचनपरो मुनीश्वरैस्तैः
    शापाग्नौ शलभदशामनायि वेनः॥ ३ ॥

तन्नाशात् खलजनभीरुकैर्मुनीन्द्रैः
    तन्मात्रा चिरपरिरक्षिते तदङ्गे।
त्यक्ताघे परिमथितादथोरुदण्डात्
    दोर्दण्डे परिमथिते त्वमाविरासीः॥ ४ ॥

विख्यातः पृथुरिति तापसोपदिष्टैः
    सूताद्यैः परिणुतभाविभूरिवीर्यः।
वेनार्त्या कबलितसंपदं धरित्रीं
    आक्रान्तां निजधनुषा समामकार्षीः॥ ५ ॥

भूयस्तां निजकुलमुख्यवत्सयुक्तै-
    र्देवाद्यैः समुचितचारुभाजनेषु।
अन्नादीनभिलषितानि यानि तानि
    स्वच्छन्दं सुरभितनूमदूदुहस्त्वम्॥ ६ ॥

आत्मानं यजति मखैस्त्वयि त्रिधाम-
    न्नारब्धे शततमवाजिमेधयागे।
स्पर्धालुः शतमख एत्य नीचवेषो
    हृत्वाऽश्वं तव तनयात् पराजितोऽभूत्॥ ७ ॥

देवेन्द्रं मुहुरिति वाजिनं हरन्तं
    वह्नौ तं मुनिवरमण्डले जुहूषौ।
रुन्धाने कमलभवे क्रतोस्समाप्तौ
    साक्षात् त्वं मधुरिपुमैक्षथाः स्वयं स्वम्॥ ८ ॥

तद्दत्तं वरमुपलभ्य भक्तिमेकां
    गङ्गान्ते विहितपदः कदापि देव।
सत्रस्थं मुनिनिवहं हितानि शंस-
    न्नैक्षिष्टाः सनकमुखान् मुनीन् पुरस्तात्॥ ९ ॥

विज्ञानं सनकमुखोदितं दधानः
    स्वात्मानं स्वयमगमो वनान्तसेवी।
तत्तादृक्पृथुवपुरीश सत्वरं मे
    रोगौघं प्रशमय वातगेहवासिन्॥ १० ॥

**********